भिन्नं स्वभावतः। कारणाभिन्नरूपेण कार्यकारणमेव हि ॥ ३१ ॥ तद्रूपेण सदा सत्यं भेदेनोक्तिर्मृषा खलु । तच्च कारणमेकं हि न भिन्नं नोभयात्मकम् ॥ ३२ ॥ भेदः सर्वत्र मिथ्यैव धर्मादेरनिरूपणात्। अतश्च कारणं नित्यमेकमेवाद्वयं खलु ॥ ३३ ॥ अत्र कारणमद्वैतं शुद्धचैतन्यमेव हि । अस्मिन्ब्रह्मपुरे वेश्म दहरं यदिदं मुने ॥ ३४ ॥ पुण्डरीकं तु तन्मध्ये आकाशो दहरोऽस्ति तत्। स शिवः सच्चिदानन्दः सोऽन्वेष्टव्यो मुमुक्षुभिः ॥ ३५ ॥ अयं हृदि स्थितः साक्षी सर्वेषामविशेषतः। तेनायं हृदयं प्रोक्तः शिवः संसारमोचकः ॥ ३६ ॥ इत्युपनिषत् ॥ हरिः ॐ तत्सत् ॥

ॐ स ह नाववत्विति शान्तिः ॥

इति पञ्चब्रह्मोपनिषत्समाप्ता ॥ ९६ ॥

प्राणाग्निहोत्रोपनिषत् ॥ ९७ ॥

शरीरयज्ञसंशुद्धचित्तसंजातबोधतः।
मुनयो यत्पदं यान्ति तद्रामपदमाश्रये ॥ १ ॥

ॐ स ह नाववत्विति शान्तिः ॥

हरिः ॐ ॥ अथातः सर्वोपनिषत्सारं संसारज्ञानातीतमन्त्रसूत्रं शारीरं यज्ञं व्याख्यास्यामः। अस्मिन्नेव पुरुषशरीरे विनाप्यग्निहोत्रेण विनापि सांख्ययोगेन[1] संसारविमुक्तिर्भवतीति । स्वेन विधिनाऽन्नं भूमौ निक्षिप्य या ओषधीः सोमराज्ञीरिति तिसृभिरन्नपत इति द्वाभ्यामनुमन्त्रयते। या ओषधयः सोमराज्ञीर्बह्वीः शतविचक्षणाः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥ १ ॥ याः फलिनीर्या अफला[2] अपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥ २ ॥ जीवलां नवारिषां[3] मातेऽवघ्राम्योषधिम्। यो त आयुरुपहरादप[4] रक्षांसि चातयात् ॥ ३ ॥ अन्नपतेऽन्नस्य नो धेह्यनमीवस्य शुष्मिणः। प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥४॥ यदन्नमग्नि बहुधा विराद्धम्[6]। रुद्रैः प्रजग्धं यदि वा पिशाचैः। सर्वंतदीशानो अभयं कृणोतु शिवमीशानाय स्वाहा ॥ ५ ॥ अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः।

---

१ सांख्येन. २ अकोशा याश्च कोशिनीः. ३ नघर्षा. ४ अपातयादुपहरादपरक्षांसि चातयात् ५ रपाहरा. ६ विराजं; विरुद्धं.

त्वं यज्ञस्त्वं ब्रह्मा त्वं रुद्रस्त्वं विष्णुस्त्वं वषट्कार आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरों[1] नमः । आपः पुनन्तु पृथिवीं पृथ्वी पूता पुनातु माम् । पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम् । यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम । सर्वं पुनन्तु मां[2] आपोऽसतां च प्रतिग्रहं[3] । अमृतमस्यमृतोपस्तरणमस्यमृतं प्राणे जुहोम्यमा शिष्यान्तोऽसि । प्राणाय स्वाहा । अपानाय स्वाहा । व्यानाय स्वाहा । समानाय स्वाहा । उदानाय स्वाहा इति कनिष्ठिकाङ्गुल्याङ्गुष्ठेन च प्राणे जुहोमि[4] । अनामिकयाऽपाने । मध्यमया व्याने । सर्वाभिरुदाने । प्रदेशिन्या समाने । तूष्णीमेकामेकैकऋचौ[5] जुहोति । द्वे आहवनीये । एकां दक्षिणाग्नौ । एकां गार्हपत्ये । एकां सर्वप्रायश्चित्तीये ॥ अथापिधानमँस्यमृतत्वायोपस्पृश्य पुनरादाय पुनरुपस्पृशेत् । सव्ये प्राणावापो गृहीत्वा हृदयमन्वालभ्य जपेत् । प्राणोऽग्निः परमात्मा पञ्चवायुभिरावृतः । अभयं सर्वभूतेभ्यो न मवेदहं कदाचनेति ॥ १ ॥

इत्याथर्वणीयप्राणाग्निहोत्रोपनिषत्सु प्रथमः खण्डः ॥ १ ॥

विश्वोऽसि वैश्वानरो विश्वरूपं त्वया धार्यते जायमानम् । विश्वं त्वाहुतयः सर्वा यत्र ब्रह्माऽमृतोऽसि । महानवोऽयं पुरुषो योऽङ्गुष्ठाग्रे प्रतिष्ठितः । तमग्निः प्रतिषिञ्चामि सोऽस्यान्ते अमृतायामृतयोनावित्येष एवात्मा । ध्यायेताग्निहोत्रं जुहोमीति सर्वेषामेव सूनुर्भवति[11] । अथ यज्ञपरिवृत[12] आहुतीर्होमयति । स्वे शरीरे यज्ञं परिवर्तयामीति । चत्वारोऽग्नयस्ते किंनामधेयाः[13] । तत्र सूर्योऽग्निर्नाम सूर्यमण्डलाकृतिः सहस्ररश्मिपरिवृत[14] एकर्षिर्भूत्वा मूर्ध्नि तिष्ठति यस्मादुक्तः । दर्शनाग्निर्नाम चतुराकृतिराहवनीयो भूत्वा मुखे तिष्ठति । शारीरोऽग्निर्नाम जराप्रणुदा हविरवस्कन्दति । अर्धचन्द्राकृतिर्दक्षिणाग्निर्भूत्वा हृदये तिष्ठति तत्र कोष्ठाग्निर्नामाशितपीतलीढखादितानि[15] सम्यग् व्यष्ट्यां अपयित्वा गार्हपत्यो भूत्वा नाभ्यां तिष्ठति । प्रायश्चित्तयस्त्वधस्तात्तिर्यक् तिस्रो हिमांशुप्रभाभिः[16] प्रजननकर्मा ॥

इत्याथर्वणीयप्राणाग्निहोत्रोपनिषत्सु द्वितीयः खण्डः ॥ २ ॥

---

१ सुवरोम् २ ग्रहं त्वं; गृहं त्वं. ३ आपोमृतस्त्वमृतो. ४ जुहोति. ५ एकऋचा; एकऋचौ. ६ एकं. ७ मस्यामृत. ८ त्वायोपदधामीत्युप. ९ विश्वरूपो विश्वं. १० विश्वामृतो. ११ भवतु. १२ वृतया आहुतीः. १३ किंभागधेयाः. १४ रश्मिभिः परिवृत. १५ दितं सम्यग् व्यष्ट्यंशयित्वा. १६ प्रभुः.

अस्य शारीरयज्ञस्य यूपरशनाशोभितस्य को यजमानः । का पत्नी । के ऋत्विजः । के सदस्याः । कानि यज्ञपात्राणि । कानि हवींषि । का वेदिः । कोत्तरवेदिः । को द्रोणकलशः । को रथः । कः पशुः । कोऽध्वर्युः । को होता । को ब्राह्मणाच्छंसी । कः प्रतिप्रस्थाता । कः प्रस्तोता । को मैत्रावरुणः । क उद्गाता । का धारापोता । के दर्भाः । कः स्रुवः । काज्यस्थाली । कावाघारौ । कावाज्यभागौ । के प्रयाजाः । के अनुयाजाः । केडा । कः सूक्तवाकः । कः शंयुवाकः । काऽहिंसा । के पत्नीसंयाजाः । को यूपः । का रशना । का इष्टयः । का दक्षिणा । किमवभृथमिति ॥

इत्याथर्वणीयप्राणाग्निहोत्रोपनिषत्सु तृतीयः खण्डः ॥ ३ ॥

अस्य शारीरयज्ञस्य यूपरशनाशोभितस्यात्मा यजमानः । बुद्धिः पत्नी । वेदा महर्त्विजः । अहंकारोऽध्वर्युः । चित्तं होता । प्राणो ब्राह्मणाच्छंसी । अपानः प्रतिप्रस्थाता । व्यानः प्रस्तोता । समानो मैत्रावरुणः । उदान उद्गाता । शरीरं वेदिः । नासिकोत्तरवेदिः[1] । मूर्धा द्रोणकलशः । पादो रथः । दक्षिणहस्तः स्रुवः । सव्यहस्त आज्यस्थाली । श्रोत्रे आघारौ । चक्षुषी आज्यभागौ । ग्रीवा धारापोता । तन्मात्राणि सदस्याः । महाभूतानि प्रयाजाः । भूतान्यनुयाजाः[2] । जिह्वेडा । दन्तोष्ठौ सूक्तवाकः । तालुः शंयुवाकः । स्मृतिर्दया क्षान्तिरहिंसा पत्नीसंयाजाः । ओंकारो यूपः । आशा रशना । मनो रथः । कामः पशुः । केशा दर्भाः । बुद्धीन्द्रियाणि यज्ञपात्राणि । कर्मेन्द्रियाणि हवींषि । अहिंसेष्टयः । त्यागो दक्षिणा । अवभृथं मरणात् । सर्वा ह्यस्मिन्देवताः शरीरेऽधिसमाहिताः । वाराणस्यां मृतो वापि इदं वा ब्रह्म यः पठेत् । एकेन जन्मना जन्तुर्मोक्षं च प्राप्नुयादिति मोक्षं च प्राप्नुयादित्युपनिषत् ॥ ३ ॥ ॐ सह नाववत्विति शान्तिः ॥ हरिः ॐ तत्सत् ॥

इत्याथर्वणीया प्राणाग्निहोत्रोपनिषत्समाप्ता ॥ ९७ ॥

---

१ नासिकान्तर्वेदिः. २ भूतगुणा; भूतानि गुणा अनुयाजा.